শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরিঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে চতুস্সপ্ততিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে চতুস্সপ্ততিতমং দশকম্॥

## ভগৱতো মধুরাপুরীপ্রৱেশ রজকনিগ্রহ, ৱাযকমালাকারকুব্জানুগ্রহ, ধনুর্ভঙ্গাদি ৱর্ণনম্ চ

সম্প্রাপ্তো মথুরাং দিনার্ধৱিগমে তত্রান্তরস্মিন্ ৱস -
    ন্নারামে ৱিহিতাশনঃ সখিজনৈর্যাতঃ পুরীমীক্ষিতুম্।
প্রাপো রাজপথং চিরশ্রুতিধৃতৱ্যালোককৌতূহল -
    স্ত্রীপুংসোদ্যদগণ্যপুণ্যনিগলৈরাকৃষ্যমাণো নু কিম্॥ **74.1** ॥

ৎৱৎপাদদ্যুতিৱৎ সরাগসুভগাস্ত্বন্মূর্তিৱদ্যোষিতঃ
    সম্প্রাপ্তা ৱিলসৎপযোধররুচো লোলা ভৱদ্দৃষ্টিৱৎ।
হারিণ্যস্ত্বদুরস্স্থলীৱদযি তে মন্দস্মিতপ্রৌঢিৱ -
    ন্নৈর্মল্যোল্লসিতাঃ কচৌঘ রুচিৱদ্রাজৎকলাপাশ্রিতাঃ॥ **74.2** ॥

তাসামাকলযন্নপাঙ্গৱলনৈর্মোদং প্রহর্ষাদ্ভুত -
    ৱ্যালোলেষু জনেষু তত্র রজকং কঞ্চিৎ পটীং প্রার্থযন্।
কস্তে দাস্যতি রাজকীযৱসনং যাহীতি তেনোদিতঃ
    সদ্যস্তস্য করেণ শীর্ষমহৃথাঃ সোঽপ্যাপ পুণ্যাং গতিম্॥ **74.3** ॥

ভূযো ৱাযকমেকমাযতমতিং তোষেণ ৱেষোচিতং
    দাশ্ৱাংসং স্বপদং নিনেথ সুকৃতং কো ৱেদ জীৱাত্মনাম্।
মালাভিঃ স্তবকৈঃ স্তৱৈরপি পুনর্মালাকৃতা মানিতো
    ভক্তিং তেন ৱৃতাং দিদেশিথ পরাং লক্ষ্মীং চ লক্ষ্মীপতে॥ **74.4** ॥

কুব্জামব্জৱিলোচনাং পথি পুনর্দৃষ্টৱাঽঙ্গরাগে তযা
    দত্তে সাধু কিলাঙ্গরাগমদদাস্তস্যা মহান্তং হৃদি।

চিত্তস্থামৃজুতামথ প্রথযিতুং গাত্রেঽপি তস্যাঃ স্ফুটং
গৃহ্ণন্ মঞ্জু করেণ তামুদনযস্তাৱজ্জগৎসুন্দরীম্॥ **74.5** ॥

তাৱন্নিশ্চিতৱৈভৱাস্তৱ ৱিভো নাত্যন্তপাপা জনা
যৎকিঞ্চিদ্দদতে স্ম শক্ত্যনুগুণং তাম্বূলমাল্যাদিকম্।
গৃহ্ণানঃ কুসুমাদি কিঞ্চন তদা মার্গে নিবদ্ধাঞ্জলি -
র্নাতিষ্ঠং বত হা যতোঽদ্য ৱিপুলামার্তিং ৱ্রজামি প্রভো॥ **74.6** ॥

এষ্যামীতি ৱিমুক্তযাঽপি ভগৱন্নালেপদাত্র্যা তযা
দূরাৎ কাতরযা নিরীক্ষিতগতিস্ত্বং প্রাৱিশো গোপুরম্।
আঘোষানুমিতৎৱদাগমমহাহর্ষোল্ললদ্দেৱকী -
ৱক্ষোজপ্রগলৎপযোরসমিষাত্ত্বৎকীর্তিরন্তর্গতা॥ **74.7** ॥

আৱিষ্টো নগরীং মহোৎসৱৱতীং কোদণ্ডশালাং ৱ্রজন্
মাধুর্যেণ নু তেজসা নু পুরুষৈর্দূরেণ দত্তান্তরঃ।
স্রগ্ভির্ভূষিতমর্চিতং ৱরধনুর্মা মেতি ৱাদাৎ পুরঃ
প্রাগৃহ্ণাঃ সমরোপযঃ কিল সমাক্রাক্ষীরভাঙ্ক্ষীরপি॥ **74.8** ॥

শ্ৱঃ কংসক্ষপণোৎসৱস্য পুরতঃ প্রারম্ভতূর্যোপম -
শ্চাপধ্ৱংসমহাধ্ৱনিস্তৱ ৱিভো দেৱানরোমাঞ্চযৎ।
কংসস্যাপি চ ৱেপথুস্তদুদিতঃ কোদণ্ডখণ্ডদ্ৱযী -
চণ্ডাভ্যাহতরক্ষিপূরুষরৱৈরুৎকূলিতোঽভূৎ ৎৱযা॥ **74.9** ॥

শিষ্টৈর্দুষ্টজনৈশ্চ দৃষ্টমহিমা প্রীত্যা চ ভীত্যা ততঃ
সম্পশ্যন্ পুরসম্পদং প্রৱিচরন্ সাযং গতো ৱাটিকাম্।
শ্রীদাম্না সহ রাধিকাৱিরহজং খেদং ৱদন্ প্রস্ৱপ -
ন্নানন্দন্নৱতারকার্যঘটনাদ্ৱাতেশ সংরক্ষ মাম্॥ **74.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে চতুস্সপ্ততিতমং দশকং সমাপ্তম্॥